च पूर्व्वरागमानप्रवासात्मकस्तत्र्र्णौ स्यात्। मानः कोपः स तु द्वेधा प्रणयेर्घ्यासमुद्भवः द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि" सा०द०अधिकं मानशब्दे। ६वैरनियातने, "अभिमानधनस्य गत्वरैः" किरा०।अभिमानेन निर्वृत्तः ठक्। आभिमानिक अभिमानसाध्ये त्रि०।

**अभिमानित** त्रि० अभिमानोगर्वोजातोऽस्य इतच्। जातगर्व्वे १जाताभिमाने अभि+मन+णिच्—आधारे क्त। २अभिमानसाधने मैथुने सुरते न०।

**अभिमानिन्** त्रि० अभि+मन—णिनि स्त्रियां ङीप्। १गर्वयुक्ते २प्रणयकोपादियुक्ते च सौत्यस्य मनोः ३पुत्रभेदे पु०। "तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च अभिमानी प्रवीणश्च जिष्णुः संक्रन्दनस्तथा। तेजस्वी सबलश्चैव सौत्यस्यैते मनोः सुताः, हृ०वं०। ४मिथ्याज्ञानयुक्ते त्रि०।"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" शा०सू०। 'यतोभिमानिव्यपदेश एषः। मृदाद्यभिमानिन्योवागाद्यभिमानिन्यश्चेतना देवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते" शा०भा०।

**अभिमानुक** त्रि० अभि+मन—बा० उकञ्। अभिमानशीले अभिमानस्य प्रागुक्तः बाधितं शक्ते च। "अनक्ता एवसुरभिमानुकोरुद्रः पशूनुत्स्यात् यदङ्क्यात्" शत०ब्रा०। 'अभिमन्तु बाधितं शक्तः स्यात्' भा०।

**अभिमाय** त्रि० अभिगतोमायामविद्याम् अत्या०स०। इति कर्त्तव्यविमूढे अज्ञानेनैव लोकानां कर्त्तव्याकर्त्तव्येषु मोहः इति तद्गतत्वान्मूढत्वम्।

**अभिमि(मे)ह्य** त्रि० अभि+मिह-बा० वेदे क्यप् लोके ण्यत्। यस्याभिमुखं मेहनं मलमूत्रत्यागः क्रियते तस्मिन् 'यत्र मेत्स्यन् भवति तत् कृष्णविषाणाया लोष्टं वा किञ्चिद्वोपहन्त्येयं ते यज्ञिया तनूरिति इयं वै पृथिवी देवयजनी सा दीक्षितेन नाभिमिह्या" शत०ब्रा०।

**अभिमुख** त्रि० अभिगतोमुखम् अत्या०स०। १सम्मुखतां गते "प्रसादाभिमुखो ब्रह्मा प्रत्युवाच दिवौकसः" कुमा०। 'वानराभिमुखोऽगच्छद्रणे रणविशारदः" रामा०। "निद्रा चिरेण नयनाभिमुखीबभूव"। मुखशब्दस्य स्वाङ्गपरत्वे स्त्रियां वा ङीप्। अभिमुखीप्रतिमा अस्वाङ्गपरत्वे टाबेव अभिमुखा शाला। अभिगतं मुखं यस्य। तत्तत्कर्म्मकरणाय २प्रेरितमुखे उद्यते।"प्रातः प्रयाणाभिमुखाय तस्मै" "पुरः प्रवेशाभिमुखो बभूव" इति च रघुः। "युयोज पाकाभिमुखैः भर्त्तुविज्ञापनाफलैः" कु०। मुखमभिलक्ष्योकृत्य अव्य०। ३आभिमुख्ये अव्य०। "कर्णं ददात्यभिमुखं मयि भाषमाणे" अमरुशतकम्।

**अभिमुखीकरण** न० न अभिमुखः अभिमुखः क्रियते अनेन अभिमुख+च्वि—क्ल—करणे ल्युट्। व्याकरणोक्ते सम्बोधने। कृते हि सम्बोधनपदाद्युच्चारणे श्रोता अभिमुखो भवति इति तस्य तथात्वम्। "सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः पुरुषः क्रियासु विनियुज्यते" इति हर्य्युक्तादिशा अभिमतक्रियाप्रवर्त्तनाविषयबोधनस्यैव सम्बोधनपदार्थत्वात् प्रवर्त्तयितव्यस्य तत्राभिमुखीभावस्यावश्यकत्वाच्च तथात्वम्।

**अभिमुखीभाव** पु० अनभिमुखस्य अभिमुखतया भावः। १आभिमुख्ये २ कार्य्यानुकूलतायाम् ३ तत्तत्क्रियोद्यमे च।

**अभिमृष्ट** त्रि० अभि+मृश—मृष—वा क्त। १स्पृष्टे २धर्षिते ३मिलिते ४संसृष्टे च। मृज—क्त। कृतमार्जने त्रि०।

**अभिमेथक** त्रि० अभि+मिथ—ण्वुल्। सर्वप्राप्तिसाधने वाक्यभेदे। स्त्रियां तु टापि अत इत्त्वम्।"सर्वाप्तिर्वा एषा वाचः यदभिमेथिका सर्व्वे कामाः अश्वमेधे सर्वया वाचा सर्वान् कामानाप्नवाम" शत०ब्रा०।

**अभिम्लात** त्रि० अभि+म्ला—तन्। सर्व्वतोम्लाने। न०त०। अनभिम्लातः तस्यापत्यम्। शिवा०अण्। आनभिम्लातः अनभिम्नात इत्यपि नमध्यपाठः।

**अभियाचन** न० अभि+याच+ल्युट्। अभिमुखप्रार्थने।

**अभियाति** पु० अभिमुखं युद्धार्थं याति या—क्तिच्। १रिपौ भावे क्तिन्। २युद्धार्थमभिगमने स्त्री। [इनि। शत्रौ।

**अभियातिन्** पु० अभियातमनेन अभि+या—भावे क्त इष्टा०

**अभियातृ** पु० अभिमुखं याति युद्धार्थम् अभि+या—तृच्। १शत्रौ, २अभिमुखगन्तृमात्रे त्रि०। स्त्रियां ङीप्।

**अभियायिन्** त्रि० अभिमुखं याति या—णिनि। अभिमुखगन्तरि। "रामाभियायिनां तेषां तदेवाभूदमङ्गलम्" रघुः।

**अभियुक्त** त्रि० अभि+युज—क्त। १परैः रुद्धे, २आसक्ते व्यवहारविषये ३प्रतिवादिनि च। "अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम्" नार०। 'अभियुक्तन्तु नान्येन नोक्तं विप्रकृतं नयेदिति" या०। ४पराक्रान्ते 'नागाभियुक्त इव युक्तमहो महेभः" माघः। ५आप्ते इष्टतमे।

**अभियुग्व(ज्व)न्** त्रि० अभि+युज—ङ्वनिप् वेदे पृ० कुत्वम्। अभियोक्तरि "स रथेन रथीतमोऽस्माकेनाभियुग्वना" ऋ० ६,४५,१५ लोके तु अभियुज्वा। स्त्रियां ङीप् वनोरश्च।

**अभियुज्** त्रि० अभिमुखं युनक्ति अभि+युज—क्विप्। अभि-